॥ चम्पूरामायणे युद्धकाण्डः ॥

श्री राजचूडामणिदीक्षितप्रणीतः

वामालकावल्लभभावमुद्रासीमाविभागेन्द्रमणीशिलेव ।
रोमावली राजति यस्य मध्ये सोमावतंसस्स सुखाय भूयात् ॥ १ ॥

भव्यारंभाय वो भूयादव्याजकरुणानिधिः ।
सव्यार्धालोकने नम्रा दिव्या या कापि देवता ॥ २ ॥

भोजेन रामचरितं ग्रथितं निशयैकया ।
एकेन पूरयत्यह्ना श्रीचूडामणिदीक्षितः ॥ ३ ॥

अनन्तरमनिन्दितामवनिनन्दनायाः कथां
प्रभञ्जनतनूभुवः प्रभुरसौ समाकर्णयन् ।
कटाक्षरुचिरेखया कलयति स्म धीरोद्धतं
शरासनमतल्लिकां समधिरोपितज्यामिव ॥ ४ ॥

विरोधिपरिमाथिनी हरिवरूथिनी मेदिनी-
सुतादयितसेवनोन्मुखवलीमुखेन्द्रानुगा ।
हृदन्तरनिरन्तराङ्कुरदभंगुराहंक्रिया
चचाल चलवारिधिर्जलधिलङ्घनाशाघना ॥ ५ ॥

क्रीडत्क्रोडेन्द्रघर्घूरवगरिमसखक्ष्वेडिताम्रेडनाति-
त्रस्यत्पञ्चास्यसंसद्द्रुतपरिहृतपर्यन्तदर्यन्तरालम् ।
मुह्यन्तं द्रागसह्याक्रमणरभसतः सह्यमारुह्य शैलं
सेना सा नालिकेरामवरसमपिबत् सह्यजातीरजातम् ॥ ६ ॥

तरङ्गितामोदमनङ्गवीरतुरङ्गमारिष्टतटीकुटीरम् ।
अटीकतारूढहनूमदंसः पटीरशैलं प्रभुरद्भुतं सः ॥ ७ ॥

तदनु च महीमहेन्द्रोऽयमतितुङ्गतरशृङ्गसङ्गतमहेन्द्रपुरं महेन्द्रगिरिमासाद्य विदधे निरवधिमणिशेवधेरुदधेरुपरोधःप्रदेशमनुपरोधमपरदुष्प्रवेशं सेनानिवेशम् ॥

तत्र च

घनतरशङ्खसङ्घनिभशृङ्गमुखप्रसर-
त्सलिलसलीलसिक्तवपुषः पटुरावपुषः ।
चटुलतरङ्गभङ्गविहितप्लवना विहृती-
रथ विदधुस्तरामधिपयोधिपयः कपयः ॥ ८ ॥

इयति च समये वियति समं त्रिभिरेकाधिकैर्मन्त्रिभिः भवच्चरणमूलमेव शरणं ममेति कृतोद्घोषणं रावणकृतदुर्भाषणं विभीषणं विलोक्य शङ्काकुलेषु सकलेषु रघुपतिरिदमुदितदयमवादीत् ॥

स रजोनिधेरवरजोऽस्त्वयं द्विष-
स्त्रिदशारिरेव स दशाननोऽथवा ।
भवतां तथापि भवतां न भीर्भया-
दविताहमस्य भवितास्मि सर्वथा [1] ॥ ९ ॥

तदनु च सदस्यभयमिति वदन्तं रघुकुलककुदमवन्दत चरणारविन्दयोः सदागतिसुतामोदितागतिराशरपतिः ॥

विस्रम्भभाजनतया न परं परन्तु
साम्राज्यदानविधिनापि सहोदरस्य ।
वीरः प्लवङ्गकुलपुङ्गवनिर्विशेषं
दोषाचरेश्वरममुं व्यतनीत्तदानीम् ॥ १० ॥

सेतुं विधातुमनसोत्तरणैकहेतुं
वीरेण विस्तृतकुशास्तरणस्थितेन ।
तिस्रोऽमुनाथ रजनीरनुनीयमानः
त्रिस्रोतसो न भजति स्म पतिः प्रसादम् ॥ ११ ॥

---

१ अत्र मातृका लुप्ता ।

दुरारोपे चापे कलयति रघूणामधिपतौ
ज्वलज्ज्वालामालावलयितशिखं मङ्क्षु विशिखम् ।
क्षणादेवोच्छुष्यत्प्रलयजलपूरोऽपि निखिल-
स्रवन्तीनामास्रैः पुनरपि पुपूरे जलनिधिः ॥ १२ ॥

तत्क्षणं च लक्ष्मणाग्रजोदग्रशिलीमुखमुखविसृमरज्वलशिखिशिखाकलाप लीलावलीढ-दुरवलेपः प्रालेयमिलनशीतलमलयजालेयतुलितमेव जलनिधिरकलयत कलालम् ॥

अन्तःपुरेऽपि विहितागसि वायसे प्रा-
गन्तःपरिस्फुरदपारकृपापयोधिम् ।
विज्ञाय वीरमुदधिर्विततापराधो-
प्यह्नाय जन्हुसुतया शरणं प्रपेदे ॥ १३ ॥

कल्पान्ततल्पमयमीश! खिलीकृतं चेत्
कालेषु शेषशयन! क्व शयिष्यसे त्वम् ।
इत्याहितस्तुतिवचस्यमरस्रवन्त्यां
वीरो मरौ जलनिधेर्विदधे तदस्त्रम् ॥ १४ ॥

तदनु नदीनाथोऽपि दीनदीनो विबुधनदीसूतिकासदने विनताखिलजनताहितसंपदि स पदि भगवतः प्रणम्य क्षम्यतामयं माधव! ममापराधः विधीयतां सेतुः इत्यभिधाय जलधि-रन्तरधात् ॥

अथ दशरथसूनोरंचले चञ्चलेऽक्ष्णो-
रहमहमिकयाद्रीनाहतान्वानरेन्द्रैः ।
नल इह बहु गृह्णन् विक्षिपन् वा न दृष्टः
जलधिपयसि सेतुः केवलं दृश्यते स्म ॥ १५ ॥

पार्श्वद्वयीघटितसप्तगिरित्रिकूटं
किं सेतुदण्डमुदरे विनिधाय गाढम् ।
काकुत्स्थवन्दनविलम्बकृतापराध
वाराकरं विधिरपीडयदात्तघोषम् ॥ १६ ॥

अथ कपिकुललीलालङ्घनालोलसाल-
द्रुमपतितफलालीदन्तुराभ्यन्तरेण ।
विभुरतुलयशश्श्रीकेतुना सेतुनासौ
परिमलदकशैलं प्राप शैलं सुवेलम् ॥ १७ ॥

तदनु च परिज्ञाताभिज्ञान विभीषण श्रवणसमसमय संपति वनौकःपतिततिविधीयमानविविधोपरोधनिरोधनमदहृदय दाशरथिकृतप्राणधारणाभ्यां प्रत्येकमावेद्यमानान्मानापहसितवासवानेकपान् वानरानीकपानालोकितुमुत्तुङ्गं प्रासादशृङ्गमारुह्याङ्कणभुवि ससुग्रीवं दशग्रीवमुद्वीक्ष्य सुग्रीवस्तत्क्षणजृम्भमाणमहाग्रहः समुत्प्लुत्य निरुपप्लवमपरमिव त्रिकूटकूटं निशाटपतिकिरीटमाहरन् लाघवेन राघवनिकटमाटीकत ॥

प्राणा मम प्रणिहितास्तव वीर पाणौ
मा साहसेन सहसाहवसंमुखो भूः ।
इत्यालपन् जयरमासुदृढोपगूढ-
मालिङ्ग्य गाढमधिपो मुमुदे कपीन्द्रम् ॥ १८ ॥

राघवोऽयं महाहवोचितसाहसोपचितैरखिलैरपि हरिबलैररिकुलैकशङ्काकरमुपरुरोध लङ्कापुरम् ॥

लीलाकुलीकृतजगत्स्वथ वीरवाद-
कोलाहलेषु तुमुलेषु हरीश्वराणाम् ।
बन्दीकृतामरनितम्बवतीजनानां
मन्दीबभूवुरकृशाः क्रमशः प्रलापाः ॥ १९ ॥

रणोन्मुखवलीमुखावलिसलीलकोलाहल-
ज्वलच्छ्रवणसंत्वरैरथ रयेण नक्तंचरैः ।
अतानि जयदुन्दुभिः क्षुभितसिन्धुभिर्बन्धुभि-
र्घनस्तनितसंपदां स्तबकितो घनैर्निस्वनैः ॥ २० ॥

तदनु च तुङ्गतरशृङ्गततिभृङ्गहतिभङ्गुररथाङ्गकशताङ्गसङ्कुले खरतरकरास्फालनस्फुटितमस्तकहास्तिके लीलाचलवालाहतिखेदनिश्वसदश्वीये पादाभिघातसविषादपादाते नखमुख-

विमुखीकृतशिलीमुखे शिलाशकलशकलीकृतातनुतनुत्राणे हठपातितविटपावलिविनिपाटिततोमरे परिपूरितहरिमुष्टिकमहाट्टहासपरिच्यावितपट्टसे साहङ्कारहुङ्कारविश्लथपरश्वथे गुरुतरभुजपरिघलघुशातितपरिघातने महत्यायोधने शाखाचरनिशाचरयोः प्रतायमाने समराभिमुखवीरावधीरण शराशय तारासुतावस्कन्दित स्यन्दन संक्रन्दन शातिसमीरित समीराशनमयास्त्र समुदित - पश्चत्वरूपवैधुर्य विधूननधुर्य विहङ्गम पुङ्गराभरितमारुतपरिष्वङ्गपुनरंकुरित सङ्गरानुषङ्गेषु प्लवङ्गेषु करतलसमानसानुना पवमानसूनुना कोपाधिततामाक्षे धूम्राक्षे परिक्षिप्ते विपक्षकुलकम्पनेऽप्यकम्पने सरभसलम्भितालम्भने निखिलभूदेवतान्तके देवान्तके च प्रापितान्तके श्रुतिकटुवचसि त्रिशिरसि च समुद्वर्तितशिरसि निरन्तराकृष्टधनुर्यष्टिकाविसृष्टसायकनिगुम्भे निगुम्भे च परिष्वक्तरम्भाकुचकुंभे समरारम्भजृम्भमाणजम्भारिविमतभङ्गदेन च अङ्गदेन शताङ्गायोजितशतोष्ट्रे वक्रदंष्ट्रे निष्ठुरमुष्टिपतननिष्पिष्टे तृणीकृतपुरान्तके नरान्तके च सम्प्राप्तकृतान्तपुरान्तिके घोरतरपरिघातनघातितवैरिसङ्घे प्रजङ्घे चक्राराहति जडीकृतजङ्घे संख्यामुखशूरजनहृदयशूलशीलेन नीलेन च समस्तजगदेकलघुहस्ते प्रहस्ते च निरस्ते निस्तन्द्रकदनादरे महोदरे च विदारितोदरे दरसंग्राममहाग्रहव्यग्रीकृतेन सुग्रीवेण च दम्भोलिकरसंस्तम्भकदोस्स्तम्भदम्भे कुम्भे च समासादितसुरवधूकुचपरिरम्भारम्भे दारुणशरनिकरदारितमुदाशरथिना दाशरथिना निशितमुखविशिखचकितरक्षोधिपासमयसमुद्बोधिते सुग्रीवनखमुखवितीर्णशूर्पणखासाधर्म्यतया सन्ततसमुद्दीर्णशोणितार्णःपरिपूर्णनिजाभ्यर्णे कुम्भकर्णे च विदीर्णे जाम्बवदनुनीतहनूमदविलम्बोपनीतमहौषधिवेधमहिमव्यपोहितपैतामहमहास्त्रविहितमोहानपि महोत्साहान् वानरवीरान् मायामयराघवदारहननविवदायामवदायासेन मोहयित्वा निकुम्भिलाकुम्भिन्यां निभृतसम्भृतयज्ञसम्भारे जम्भारिवैरिणि अप्यतिकायकायविस्रंसितमांसलमांससंप्रीणितपतत्रिभिस्सुत्रामलोकयात्रापरे समन्ततोऽपि निरन्तरकन्दलमदसुन्दरीजनाक्रन्दरवदन्तुरहरिदन्तरात् अन्तःपुरात् निर्गत्य निसर्गपरुषसांराविणो रावणः आहवभुवमवजगाहे ॥

विंशत्यर्धकठोरकार्मुकहठाकृष्टिस्फुरन्मुष्टिके
वर्षत्याशुगवर्षमाशरपतौ हर्षादमर्षादपि ।
जानीमोऽभिमुखेन लक्ष्यनिहितान् वीरान्वरीतुं हरीन्
पर्याप्ता न बभूवुराहवमुखे स्वर्वारवामभ्रुवः ॥ २१ ॥

समरभमयावकृष्टदशकार्मुकयन्त्रगल-
न्निशितशिलीमुखक्षतवलीमुखसन्ततिकः ।

अधिसमरं क्षणदाचराभिलषितलक्ष्यतया
परमजनिष्ट सोऽयमपराधपृषत्कगणः ॥ २२ ॥

तदनु च कथावशेषं शेषमपि हरिबलमवलोक्य रोषणो विभीषणः प्रीणयन् दाशरथिमाशरपतिसारथिमप्रतिरथः प्रतिरथभञ्जदया गदया निर्दयं मर्दयामास ॥

रक्षःपतिस्तदनु शक्तिमकुण्ठशक्ति
चिक्षेप वक्षसि शिलाकठिनेऽनुजस्य ।
मध्ये भवन् विनतवत्सलतैकसीमा
रामानुजो बत मुमोह तयापविद्धः ॥ २३ ॥

आकर्णकृष्टधनुषं दशकण्ठमग्रे
मोहाकुलं च सहजं मुहुरीक्षमाणः ।
कोपेन शोकरभसेन च दुर्निरीक्ष्यो
वीरोऽथ वीरकरुणाविव लक्ष्यते स्म ॥ २४ ॥

सौमित्रिवक्षसि पपात सुरारिशक्तिः
वीरस्य रूढमभवद्धृदि शोकशल्यम् ।
विद्धोऽथ तत्र विभुरेष बभूव चित्र
नीरन्ध्रनिस्सरदमन्दतरास्रदिग्धः ॥ २५ ॥

अवलम्ब्य धैर्यमवधीर्य हीनतां विभुना कृतिप्रतिकृतं चिकीर्षुणा ।
विबुधाहितं युधि शरैर्विमोहितं विदधेऽपनीतमपरत्र सारथिः ॥ २६ ॥

जिघ्रन्नोषधिमञ्जनासुतसमानीतामसौ लक्ष्मणो
यावज्जीवति यावदेव च विभुर्गाढं तमालिङ्गति ।
तावत्पंक्तिमुखः क्षणाद्रणमुखे विस्फारितज्यालता-
टङ्कारध्वनिधिक्कृतार्णवरवस्थेमाऽवतस्थे तदा ॥ २७ ॥

दशस्यन्दननन्दनोऽपि मातलिसमानीतं संक्रन्दनस्यन्दनमलंकुर्वन्नहंकुर्वदभियातगर्वनिर्वापणोद्दण्डं कुण्डलयति स्म कोदण्डम् ॥

आकर्णं परिकृष्य कार्मुकमसावह्नाय रक्षःपते-
रम्भोजासनशासनेन कवचं दुर्भेदमालोचयन् ।
आयुष्याक्षरपङ्क्तिकामिव मृजन्नास्यालिकाभ्यन्तरे
दम्भोलिप्रतिमानमार्गणगणानापातयत्तक्षणात् ॥ २८ ॥

तदनु च तत्तादृशानां विभीषणोपदेशानामनुस्मरन्नन्तःपरिणमद्दुर्दिनादीनमुखो दशमुखो भृशमखिद्यत। तत्क्षणेन च कथञ्चिदवलम्ब्य धैर्यं कालविपर्ययार्थमेव रोषोषर्बुधेन प्रज्वलन्नस्त्रप्रत्यस्त्रप्रयोगवित्रस्तसमस्तभुवन प्रस्तावयति स्म विस्तारकमतिदारुणमनन्वयोदाहरणं रणम् ॥

अम्भोधेरिव बुद्बुदावलिरहोधाराम्रुचापांमुचा
सन्नद्धेन रघूद्वहेन शतशो नाराचधाराकिरा ।
अर्धोदित्वरनिष्ठुरोक्तिरसकृत् कृत्तापि तत्तादृशी
सद्यो हन्त समुद्ययौ दशमुखी क्रव्यात्प्रभोरक्रमात् ॥ २९ ॥

तदनु च वैरिवधाय विबुधाधिपसारथिबोधितो दाशरथिः सन्धाय वैधात्रमस्त्रं निर्जरारेरुरसि ससर्ज ॥

दम्भोलिर्भवति स्म यत्र भिदुरो जम्भारिमुक्तः स्वयं
चक्रं न क्रमते स्म वित्रुटदरं त्रैविक्रमं यत्र च ।
क्षिप्रं वक्षसि रक्षसामधिपतेरस्मिन्विधेःप्रापतत्
अस्त्रं सोप्यवनावमुष्य च शिरःश्रेणीषु गृध्रावली ॥ ३० ॥

पुनरुज्जीवनाशङ्कातरलं दिविषद्बलम् ।
हतेऽपि रावणे नैव क्षणं पुष्पाण्यवाकिरत् ॥ ३१ ॥

कचभरनहनं पुलोमजायाः कतिचिदहान्यपगर्भकं यथा स्यात् ।
विभुशिरसि तथा सुधाशनास्स्वस्तरुकुसुमान्यथ हर्षतोऽभ्यवर्षन् ॥ ३२ ॥

तदनु चोपश्रुत्य पत्युर्मृत्युमाकुलमतिरमन्दोदितशोकभरा मन्दोदरी शातोदरी जनशतपरीता नयनयुगलगलदविरताविरलाम्बुर्विललाप ॥

नक्तंचरेन्द्र बहुधा वसुधासुताया नक्तंदिवं विदधतो भवतोऽनुरागम् ।
युक्तं किमेवमवनीं जननीममुष्या व्यक्तं विधाय शयितुं सुदृढोपगूढाम् ॥ ३३ ॥

स्वर्वन्दीजनधूतचामरमरुत्पोतापनीतश्रम-
स्तल्पे कल्पकपुष्पकल्पितमहाशिल्पे शयानः पुरा ।
रक्षोनाथ कथं नु गृध्रपटलीपक्षानिलावीजितः
शेषे कीशचयाविमुक्तपरुषग्रावाकुले भूतले ॥ ३४ ॥

विद्धो दशास्यो विशिखैर्ममेति गर्वायसे राघव किं वृथैव ।
चित्ते वसत्येव ममैष तत्ते मामप्यभित्वा कथमिष्टसिद्धिः ॥ ३५ ॥

इति बहुवारं कुररीमिव चिरमविरतं विलप्य तदनु च चैतन्यापह वेदनावतीं प्रजावतीमाश्वासयन् विश्वाधिकदयानिधेर्दाशरथेरनुज्ञया विज्ञानभूषणो विभीषणो निखिलमपि समग्रमग्रजन्मनः कर्तव्यं कर्म निर्वर्तयन् तत्कालप्रवर्तितप्रशस्तालङ्कारं प्रविश्य लङ्कापुरं तत्क्षणं लक्ष्मणावर्तितराज्याभिषेकस्सविशेषविनीतवेषः पुनरपि समाजमाजगाम ॥

पूर्वप्रतिश्रुतपुलस्त्यजसूनुराज्यसाम्राज्यदानमुदितेन विभीषणेन ।
कोटीरकोटिकुसुमार्चितपादमूलो मेने विभुस्स्वमृणतो महतो विमुक्तम् ॥ ३६ ॥

ततश्च ॥

द्विषा रुद्धामिद्धानिलसखविशुद्धां प्रियतमां
विधायाङ्के पङ्केरुहदृशमशङ्केन मनसा ।
विमानं कौबेरं वियति वलमानं सफलयन्
कपिव्रतोपेतो नगरमुपायतो रघुपतिः ॥ ३७ ॥

संश्लिष्यन् भरतं पदाग्रविनतं शत्रुघ्नमप्यादरात्
मातॄणामविशेषतः सविनयं मौलौ वितन्वन् पदे।
सर्वानप्यनुरञ्जयन्पुरजनान् साम्राज्यसिंहासने
वीरोऽसौ विहिताभिषेचनविधिर्विश्वं ररक्षाऽक्षतम् ॥ ३८ ॥

इति श्रीदन्तिद्योति दिवाप्रतीपाङ्क सत्यमङ्गल रत्नखेट श्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसंभवस्य श्रीमदर्धनारीश्वरगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु एकदिवससंदृब्धो युद्धकाण्डचम्पूः संपूर्णः ।

हरिः ओं । शिवाय नमः । त्रिपुरसुन्दर्यै नमः ॥